
# चतुर्थः पाठः। विध्यर्थमाला । (कण्ठस्थीकरणार्थम्)

सुभाषितानि संस्कृतभाषायाः वैशिष्ट्यपूर्णानि पद्यरत्नानि । सुभाषितानि अस्माकं मनः रञ्जयन्ति, अस्माकं ज्ञानं वर्धयन्ति, कथं व्यवहारः करणीयः, किं कर्तव्यं, किं च न करणीयम् इति सम्यक् बोधयन्ति ।



**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम्।**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।।१।।**

[ सुखार्थी चेत् विद्यां **त्यजेत्**। विद्यार्थी चेत् सुखं **त्यजेत्**। सुखार्थिनः विद्या कुतः ? विद्यार्थिनः सुखं कुतः ?]

**दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम्।**
**सत्यपूतां वदेत् वाणीं मनःपूतं समाचरेत्।।२।।**

[ दृष्टिपूतं पादं **न्यसेत्**। वस्त्रपूतं जलं **पिबेत्**। सत्यपूतां वाणीं **वदेत्**। मनःपूतं **समाचरेत्**।]

**धनमलब्धं काङ्क्षेत, लब्धं रक्षेत् प्रयत्नतः।**
**रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत्।।३।।**

[अलब्धं धनं **काङ्क्षेत**। लब्धं (धनं) प्रयत्नतः **रक्षेत्**। रक्षितं (धनं) सम्यक् **वर्धयेत्**। वृद्धं (धनं) तीर्थेषु **निक्षिपेत्**।]

**अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत्।**
**जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्।।४।।**

[अक्रोधेन क्रोधं **जयेत्**। साधुना असाधुं **जयेत्** । दानेन कदर्यं **जयेत्**। सत्येन च अनृतं **जयेत्** ।]

**प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।**
**किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति।।५।।**

[नरः आत्मनः चरितं प्रत्यहं **प्रत्यवेक्षेत** किं नु मे (चरितं) पशुभिः तुल्यम्? किं नु (मे चरितं) सत्पुरुषैः (तुल्यम्) इति।]

## भाषाभ्यासः



**श्लोकः १–**

**१) एकवाक्येन उत्तरत।**

(अ) विद्यार्थी किं त्यजेत् ?
(आ) सुखार्थी किं त्यजेत्?

**२. सन्धिविग्रहं कुरुत।**

१) त्यजेद्विद्याम्   २) त्यजेत्सुखम्
३) कुतो विद्या   ४) कुतो विद्यर्थिनः

**३. समानार्थकशब्दं लिखत।**

१) विद्या २) विद्यार्थी

**श्लोकः २.**

**१) एकवाक्येन उत्तरत।**

(अ) कीदृशं जलं पिबेत् ?
(आ) कीदृशीं वाणीं वदेत् ?

**२. समानार्थकशब्दं चित्वा लिखत।**

१) वाक् २) पवित्रम् ३) ऋतम् ४) उदकम्।

**३. स्तम्भमेलनं कुरुत।**

| | |
|---|---|
| विशेषणम् | दृष्टिपूतः, वस्त्रपूतम्, मनःपूतम्, सत्यपूता |
| विशेष्यम् | वाणी, आचरणम्, पादः, जलम् |

**श्लोकः ३–**

**१. एकवाक्येन उत्तरत।**

(अ) मनुजः कीदृशं धनं काङ्क्षेत ?
(आ) वृद्धं धनं कुत्र निक्षिपेत्?

**२. क्रमानुसारं रचयत।**

१) धनस्य रक्षणम्। (२) तीर्थेषु दानम्।
(३) धनस्य इच्छा। (४) धनस्य वर्धनम् ।

**श्लोकः ४ –**

**१. एकवाक्येन उत्तरत।**

अ) क्रोधं केन जयेत्? आ) दानेन किं जयेत्?
इ) सत्येन किं जयेत्?

**२. विरुद्धार्थकशब्दं लिखत ।**

क्रोधः, असाधुः, सत्यम्, दानम् ।

**३. श्लोकात् तृतीयान्तपदानि चित्वा लिखत ।**

**४. सन्धिविग्रहं कुरुत ।** चानृतम्

**श्लोकः ५ –**

**१) एकवाक्येन उत्तरत।**

अ) प्रत्यहं किं प्रत्यवेक्षेत ?
आ) चरितं केन तुल्यं माऽस्तु ?
इ) चरितं केन तुल्यम् अस्तु ?

**२. सन्धिं कुरुत।**

अ) पशुभिः + तुल्यम् आ) किम् + नु
इ) सत्पुरुषैः + इति ई) नरः + चरितम्

**३ समानार्थकशब्दानां युग्मं चिनुत।**

| | |
|---|---|
| अ | प्रत्यहम् , नरः, चरितम्, पशुः, तुल्यः, सत्पुरुषाः |
| आ | वर्तनम्, मृगः, प्रतिदिनम्, मनुजः, सज्जनाः, समः |

**पठत अवगच्छत !** **स्वराणां सृष्टिः।**

**पङ्क्तिद्वयं पठत।** १. सेवा न किञ्चिदस्तीति भिक्षा **नैव** च **नैव** च। नैव = न + एव
२. **रथस्यैकं** चक्रं भुजगयमिताः सप्त तुरगाः। रथस्यैकम् – रथस्य + एकम्।

**३) वृद्धिसन्धिः।**

**अ) अ/आ + ए/ऐ = ऐ**
१. न + एतद् = नैतद्।
२. मम + ______ = ममैश्वर्यम्।

**आ) अ/आ + ओ/औ = औ**
१. मम + ओजः = ममौजः।
२. तव + ______ = तवौदार्यम्।

**पङ्क्तिद्वयं पठत।** १. योगक्षेमं **वहाम्यहम्**। वहाम्यहम् = वहामि + अहम्।
२. **अस्त्युत्तरस्यां** दिशि देवतात्मा हिमालयो नाम नगाधिराजः। अस्त्युत्तरस्यां = अस्ति + उत्तरस्याम्।

**४. यणसन्धिः।**

**अ) इ/ई + विजातीयः स्वरः = य्।**
१. इति + अपि = इत्यपि।
२. करोमि + ____ = करोम्यहम्।

**आ) उ/ऊ + विजातीयः स्वरः = व्।**
१. खलु + एतत् = खल्वेतत्।
२. मनु + ______ = मन्वन्तरम्।

**पङ्क्तिद्वयं पठत।** १. **द्वाविमौ** पुरुषौ लोके क्षरश्चाक्षर एव च। द्वाविमौ = द्वौ + इमौ।
२. **मातापितराविह** मम न स्तः, एकाकी खलु खिन्नोऽहम्। मातापितराविह – मातापितरौ + इह।

**५. अयादिसन्धिः ।**

**अ) ए/ऐ + कोऽपि स्वरः = अय्/आय्**
१. समीपे + एव = समीपयेव / समीप एव ।
२. कृते + ______= कृतयायाहि / कृत आयाहि ।
३. ______ + अपि = मत्यायपि / मत्या अपि ।
४. तस्मै + ______ = तस्मायपि / तस्मा अपि ।

**आ) ओ/औ + कोऽपि स्वरः = अव्/आव्**
१. द्वौ + एव = द्वावेव।
२. तौ + ______ = तावपि।
३. ______+ अपि = उभावपि।
४. ______+ आस्ताम् = सुहृदावास्ताम्।

## रम्यसंस्कृतम्। क्रियापदं किं कथयति? – १

**'क्रियापदम्' इति वाक्यस्य महत्त्वपूर्णम् अङ्गम्।**

**बालकः** ग्रन्थं **पठति**। इति वाक्ये '**पठति**' इति क्रियापदम्।

तेन कस्य बोधः भवति ?

(१) पठनस्य क्रिया ✓

(२) परस्मैपदम् ✓

(३) प्रथमः पुरुषः ✓

(४) एकवचनम् ✓

(५) लट्लकारः ✓

(६) धातोः गणविकरणम् ✓

(७) कर्तुः पुरुषः वचनं च ?

**अधुना एतानि वाक्यानि पठत।**

(१) **बालकः** ग्रन्थं **पठति**।

(२) **बालकौ** ग्रन्थं **पठतः**।

(३) **बालकाः** ग्रन्थं **पठन्ति**।

(४) **अहं** ग्रन्थं **पठामि**।

(५) **त्वं** ग्रन्थं **पठसि**।


एतेषु वाक्येषु क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति। यदि कर्तृपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अतः कर्तृप्रधानानि वाक्यानि इमानि ।

'**पठति**' इति क्रियापदस्य श्रवणेनैव कर्ता प्रथमपुरुषस्य एकवचने इति ज्ञायते । तथैव '**पठामि**' इति पदेन कर्ता उत्तमपुरुषस्य एकवचने इति स्पष्टं भवति । एवं क्रियापदेन कर्तृपदस्य पुरुषस्य वचनस्य अपि बोधः भवति ।

**कर्तृवाच्यः प्रयोगः। (कर्तरि प्रयोगः)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| **प्रथमा विभक्तिः** | द्वितीया विभक्तिः | **कर्तृपदस्य पुरुषवचनानुसारम्** |


(१) मधुरा सुधाखण्डान् आनयति।




**क्रियापदं कर्तृपदम् अनुसरति ।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**

२) वयं ग्रन्थं पठामः।




**क्रियापदं कर्तृपदम् अनुसरति ।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**

# रम्यसंस्कृतम्। क: कृतवान् ? का कृतवती ?

| | | | |
|---|---|---|---|
|  |  |  |  |
| बाल: जलं पिबति। | बाल: जलं **पीतवान्**। | अनीश: गच्छति। | अनीश: **गतवान्**। |
|  |  |  |  |
| छात्रा: खेलन्ति। | छात्रा: **खेलितवन्त:**। | वयं पठाम:। | वयं **पठितवन्त:**। |
|  |  |  |  |
| महिला क्षिपति। | महिला **क्षिप्तवती**। | दीपा नृत्यति। | दीपा **नर्तितवती**। |
|  |  |  |  |
| ता: प्रक्षालयन्ति। | ता: **प्रक्षालितवत्य:**। | छात्रा: लिखन्ति। | छात्रा: **लिखितवत्य:**। |

पीतवान्, गतवान्, खेलितवन्त:, पठितवन्त: इत्यादीनि भूतकालवाचकानि क्तवतु-प्रत्ययान्त-विशेषणानि ।

## सम्भाषापत्रम्



### १. मेलनं कुरुत।

| | |
|---|---|
| १. शिक्षका: | सुप्तवती। |
| २. बालिका: | प्रविष्टवन्त:। |
| ३. रक्षक: | पूजितवत्य:। |
| ४. बिडाली | ताडितवान्। |

### २. शुद्धं वा अशुद्धम्?

१. सिंह: तं हतवान्।
२. ते बालका: अन्नं न त्यक्तवन्त:।
३. आपणिक: देवं नतवती।
४. एता: अद्य क्रीडितवन्त:।
५. अहं शाकानि कर्तितवान्।

## ३. तालिकां पूरयत ।

| | सः | ते | सा | ताः |
|---|---|---|---|---|
| खादति | खादितवान् | खादितवन्तः | खादितवती | खादितवत्यः |
| करोति | कृतवान् | कृतवन्तः | कृतवती | कृतवत्यः |
| वदति | | | उदितवती | |
| पश्यति | | दृष्टवन्तः | | |
| गायति | | | | गीतवत्यः |
| उत्तिष्ठति | | | | उत्थितवत्यः |
| नयति | नीतवान् | | | |
| यच्छति | | | | दत्तवत्यः |
| पूजयति | | पूजितवन्तः | | |
| लभते | | | | लब्धवत्यः |

## ४. परिच्छेदे क्तवतु-रूपाणि अधोरेखितानि कुरुत ।

दीपावलि-उत्सवसमयः आसीत्। जनाः गृहाणि स्वच्छीकृतवन्तः। माता मिष्टान्नानि कृतवती। जनकः नूतनवस्त्राणि क्रीतवान् किन्तु स्फोटकानि न आनीतवान्। भगिनी सुन्दरीं रङ्गवल्लीम् आलिखितवती। महिला: मृद्दीपान् प्रज्वाल्य स्थापितवत्यः। अहं मित्रैः सह भ्रमणार्थं बहिः गतवान्। सर्वत्र हर्षः प्रकाशः च।

### पठत अवगच्छत ! विसर्गसन्धिः

